# भावप्रत्ययार्थनिर्णयः

**Dr. G. S.V. Dattatreya Murthy**
Assistant Professor
Department of Sanskrit & IC
SCSVMV (Deemed to be university)
Enathur, Kanchipuram - 631561

प्रकृतिजन्यबोधे प्रकारतया भासमानः धर्मः भावः। स एव त्त्वाद्यर्थः। समासादौ सम्बन्धविशिष्टे शक्तिस्वीकारात्संबन्धस्य प्रकृतिजन्यबोधे प्रकारत्वात्संबन्धबोधमेव भावप्रत्ययो बोधयतीत्यर्थः। तस्य भावः स्त्वतलौ इति सूत्रे वार्तिककारः भावशब्दार्थं द्विधा व्याख्यानं कृतवान्। तत्र प्रथमं वार्तिकं **यस्य गुणस्य भावात् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलौ** इति। व्याख्यातं च कैयटेन गुणशब्देन यावन् पराश्रयो भेदको जात्यादिः स सर्व इह गृह्यते। यस्य गुणस्य भावात्=यस्य गुणस्य जात्यादिप्रवृत्तिनिमित्तस्य वर्तमानत्वादित्यर्थः।द्रव्यशब्देन विशेष्यभूतः सत्वभावापन्नोर्थः उच्यते। तस्मिन् द्रव्ये शब्दनिवेशः=शब्दस्य प्रवृत्तिः यस्य गुणस्य भावात् सः त्वतलाभ्याममभिधेयः इत्यर्थः। ततश्च जात्यादिप्रवृत्तिनिमित्तकमेव भावप्रत्ययार्थ इति स्पष्टं भवति। रूपवत्वमित्यादौ त्वप्रत्ययः गुणवृत्तिजात्यभिधायी। शुक्लादिशब्दाः यत्र गुणिपराः, तत्र शुक्लत्वमित्यादौ गुण एव त्वाप्रत्ययार्थः। गुणपरेभ्यस्तु जातावेव प्रत्ययः। अणुमहद्दीर्घादयोपि नित्यं परिमाणिवाचिकाः इति अणुत्वमित्यादौ त्वप्रत्ययः परिमाणवाची। पाचकः इत्यादौ क्रियाविशेषणबोधकात् तदुत्तरभावप्रत्ययेन विशेष्यतया क्रियैवाभिधीयते। घटत्वमित्यादौ घटत्वजातिः प्रत्ययार्थः। राजपुरुष इत्यादौ स्वस्वामिभावादिसम्बन्धविशेषणकबोधात् तदुत्तरभावप्रत्ययस्य सम्बन्धोर्थः। एवं च त्वप्रत्ययेन कुत्रचित्गुणः, कुत्रचित्जातिः, कुत्रचित् क्रिया, कुत्रचित् सम्बन्धः इति तत्तप्रवृत्तिमतभेदेन स स उच्यते।

## अत्र निगमनम्

भावप्रत्ययस्य शक्तिः धर्मे, स च प्रवृत्तिरूपः। स च बहुविधः इति कुत्र चिज्जातेः, कुत्र चिद्गुणस्य कुत्रचित् क्रियायाः, कुत्रचित्सम्बन्धस्य च तद्वाच्यत्वम्। यत्र च प्रवृत्तिनिमित्तं नास्ति डित्थादिषु तत्र शब्द एव त्वप्रत्ययार्थ इति कौण्डभट्टः।

**********************